JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science



# सङ्कलनात्मकं मूल्याङ्कनम् - II, 2013

## विषय—संस्कृतम् सम्प्रेषणात्मकम्

*समय : होरात्रयम्* **कक्षा—नवमी** **पूर्णांक : 90**

*निर्देशा :*

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति :

| | | |
|---|---|---|
| खण्डः (क) | अपठित-अवबोधनम् | 10 अङ्काः |
| खण्डः (ख) | रचनात्मक-कार्यम् | 15 अङ्काः |
| खण्डः (ग) | अनुप्रयुक्त-व्याकरणम् | 30 अङ्काः |
| खण्डः (घ) | पठित-अवबोधनम् | 35 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## खण्डः—'क'

### अपठित-अवबोधनम् (10 अङ्काः)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत— $(2 \times 1 = 2)$

भारतदेशः रमणीयः देशः। यत्र प्रकृतिः स्वीयैः सर्वैः समभावैः समृद्धिं सौन्दर्यं च प्रसारयति। देवाः अपि अस्याः भूमेः गीतकानि गायन्ति। प्राचीनकालात् एव अयं धर्मपरायणदेशः। सदाचाररूपो धर्मः लोके सर्वविधसुखमूलम्। परं वर्तमानकाले संसर्गदोषेण जनाः कथञ्चिद् अर्थार्जनेन बाह्यसुखोपभोगाय एव सम्प्रवर्तन्ते। अद्य जनाः पापपुण्यप्रवृत्तिं परित्यज्य कर्त्तव्यात् भ्रष्टाः। ते कुमार्गेण एवं जीवनं यापयितुम् इच्छन्ति। तेन राष्ट्रस्य समाजस्य च महती हानिः अवलोक्यते। सत्यपि प्रभूते धान्यभाण्डारे शिशवः कुपोषणग्रस्ताः अवलोक्यन्ते, प्रकृत्या यद् दीयते तस्य सम्यक् संरक्षणव्यवस्था एव नास्ति। अधिकांशतो जनाः दुःखिनः एवं प्रतीयन्ते।

I. एकपदेन उत्तरत—

(i) भारतदेशः कीदृशः देशः?

(ii) के भारतभूमेः गीतकानि गायन्ति?

II. पूर्णवाक्येन उत्तरत—

(i) कीदृशः धर्मः सर्वविधसुखमूलम् अस्ति?

(ii) अद्य जनाः कं परित्यज्य कर्त्तव्यात् भ्रष्टाः सन्ति?

कृ० प० उ०

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत—

(i) 'प्रसारयति' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(अ) समृद्धिम् (ब) सौन्दर्यम्
(स) सर्वैः (द) प्रकृतिः

(ii) 'सुखिनः' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) दुखी (ब) दुःखिनम्
(स) दुःखिनः (द) दुःखिनौ

(iii) 'धर्मः' अस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(अ) धर्मपरायणः (ब) सदाचाररूपः
(स) पापपुण्ययुक्तः (द) कुमार्गयुक्तः

(iv) 'ते कुमार्गेन एवं .........' अत्र 'ते' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(अ) देवेभ्यः (ब) शिशुभ्यः
(स) जनेभ्यः (द) सर्वेभ्यः

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## खण्डः 'ख'

## रचनात्मकं-कार्यम् (15 अङ्काः)

2. भवान् जयः। स्वछात्रावासजीवनविषये पितरं प्रति लिखिते पत्रे रिक्तस्थानि मञ्जूषाप्रदत्तपदसहायतया पूरयतु— (5)

परीक्षाभवनम्

.................. (i)

तिथिः ..................

पूज्यपितृपादमहोदयाः।

सादरं .................. (ii)।

समाचारोऽयम् अस्ति यत् मया बहु-प्रयत्नैः दिल्लीनगरे छात्रावासः प्राप्तः। छात्रावासे मम .................. (iii) बहु-स्वच्छः अस्ति। कक्षे समीरस्य आगमनाय वातायनानि अपि सन्ति। सूर्यस्य प्रकाशः अपि .................. (iv) मम कक्षे आगच्छति। मम कक्षे एकः अन्यः छात्रः अपि .................. (v)। भोजनालयः .................. (vi) एव अस्ति। सः तु अतीव .................. (vii) अस्ति। छात्रावासं परितः हरीतिमा अस्ति। छात्रावासे अति विशालं .................. (viii) अस्ति यत्र छात्राः रात्रौ बहुसमयपर्यन्तम् क्रीडन्ति। मम छात्रावासः एकस्मिन् शान्तस्थाने अस्ति। न कापि चिन्ता करणीया। शेषं सर्वम् .................. (ix) अस्ति।

मातृचरणयोः मम प्रणामाः। भवतां पुत्रः

.................. (x)

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

मञ्जूषा

| |
|---|
| शोभनम्, समीपे, कक्षः, निवसति, प्रणामाः, सरलतया, स्वच्छः, क्रीडाक्षेत्रम्, दिल्लीतः जयः |

3. मञ्जूषायां प्रदत्तपदानां सहायतया चित्रं संस्कृतेन पञ्चवाक्यानि लिखत— (2 × 5 = 10)



मञ्जूषा

| |
|---|
| मङ्गलसूत्रम्, कक्षः, प्रदर्शयति, पश्यति, जनः, द्वारम्, वातायनम्, पादपः, शाटिका, गच्छन्, पतिः, चित्रे, पश्यामः, कङ्कणम्, अपि, बहिः। |

अथवा

मञ्जूषायाः प्रदत्तपदानां सहायतया 'यात्रा वर्णनम्' इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत— (2 × 5 = 10)

मञ्जूषा

| |
|---|
| यात्रा, महिलाः, चलन्ति, गायन्ति, वस्त्रम्, गजः, खगाः, समीरः, मेघाः, सूर्यः, उदेति, यानेन, मिलित्वा, सह, गमिष्यामः, एवम्, च, परन्तु। |

## खण्डः 'ग'

## अनुप्रयुक्तव्याकरणम् (30 अङ्काः)

4. उचितशब्दरूपाणि चित्वारिक्तस्थाननिपूरयत— (6)

(i) को न जानाति .................. विक्रमादित्यस्य न्यायः।

(अ) राज्ञः (ब) राजा (स) राजानम् (द) राज्ञाम्

(ii) सायंकालेस्वनीडानि .................. पक्षिणः शोभन्ते।

(अ) गच्छन् (ब) गच्छन्तः (स) गच्छतः (द) गच्छन्तम्

(iii) .................. समक्षं अहम् किमपिवक्तुम् न शक्नोमि।

(अ) भवन्तम् (ब) भवताम् (स) भवत्सु (द) भवद्भिः

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

(iv) अनेकै: .................. मञ्चे स्वरचना: पठिता: ।
(अ) विदुष: (ब) विद्वांस: (स) विद्वद्भ्य: (द) विद्वद्भि:

(v) बाला: .................. यात्रिणौपश्यन्ति ।
(अ) गच्छन् (ब) गच्छन्त: (स) गच्छतो: (द) गच्छन्तौ

(vi) .................. श्रेष्ठ: बाल: एव पुरस्कारम् लप्स्यते ।
(अ) भवन्त: (ब) भवत: (स) भवत्सु (द) भवद्भि:

5. उचितसङ्ख्यावाचकपदै: रिक्तस्थानि पूरयत— (6)

(i) .................. उद्याने वानरा: निवसन्ति स्म। (1)
(ii) .................. बालिके विद्यालयम् अगच्छताम्। (2)
(iii) वृक्षात् .................. फलानि पतन्ति। (3)
(iv) .................. वेदेषु भारतीया संस्कृति: विद्यते। (4)
(v) क्रीडाशिक्षक: .................. बालकै: सह क्रीडति। (5)
(vi) युष्मत्सु .................. एव पुष्पगुच्छं स्वीकरिष्यामि। (1)

6. उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत— (6)

I. पुत्रा: स्वास्थ्यं प्रति .................. ।
(अ) चिन्तयेत् (ब) चिन्तये: (स) चिन्तयेयु: (द) चिन्तयतु

II. बालिका रङ्गमञ्चे .................. ।
(अ) नृत्येत् (ब) नृत्येताम् (स) नृत्यतु (द) नृत्येयु:

III. छात्र: पितरौ .................. ।
(अ) सेवेत (ब) सेवेय (स) सेवेत् (द) सेवेयु:

IV. त्वम् चणकान् .................. ।
(अ) भक्षयस्व (ब) भक्षयताम् (स) भक्षय (द) भक्षयतु

V. सर्वेषाम् जनन्य: स्वादूनि भोजनानि .................. ।
(अ) पचेत् (ब) पचेत (स) पचेयु: (द) पचतु

VI. वयं पाठान् पठित्वा .................. ।
(अ) मोदेय (ब) मोदेमहि (स) मोदेया: (द) मोदेरन्

7. उचितपदेन रिक्तस्थानानि पूरयित्वा लिखत— (6)

(i) .................. निकषा नदी प्रवहति ।
(ii) .................. विना स: कथं विदेशं गमिष्यति ?
(iii) राम: .................. अलम् ।
(iv) .................. न प्रमदितव्यम् ।

(v) .................. दक्षिणत: विवेकानन्दस्मारक: अस्ति।

(vi) .................. मानव: श्रेष्ठ: अस्ति।

(i) (अ) ग्रामात् (ब) ग्रामम् (स) ग्रामेण (द) ग्रामस्य

(ii) (अ) धनेन (ब) धनाय (स) धनस्य (द) धने

(iii) (अ) रावणेन (ब) रावणात् (स) रावणाय (द) रावणम्

(iv) (अ) स्वाध्यायात् (ब) स्वाध्यायस्य (स) स्वाध्याये (द) स्वाध्याये

(v) (अ) भारतात् (ब) भारतेन (स) भरतं (द) भारतस्य

(vi) (अ) जीवेभ्य: (ब) जीवै: (स) जीवानां (द) जीवान्

8. (क) अधोलिखितवाक्येषु कोष्ठके प्रदत्तौप्रकृतिप्रत्ययौसंयोज्यरिक्तसथानपूर्तिं कृत्वावाक्यानिपुन: लिखत— (1 × 3 = 3)

(i) वने .................. नर: एकम् सिंहम् अपश्यत्। (गम् + शतृ)

(अ) गच्छति (ब) गच्छत: (स) गच्छन् (द) गमन्

(ii) नृप: स्त्रिय: विलाप .................. । (श्रु + क्तवतु)

(अ) श्रुतवत्य: (ब) श्रुतवती (स) श्रुतवान् (द) श्रोतवत्य:

(iii) नकुलेन कृष्णसर्प: .................. । (दृश् + क्त)

(अ) दष्ट: (ब) दृष्ट: (स) दृशित: (द) पश्यित:

(ख) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौपृथक्कृत्य लिखत— (1 × 3 = 3)

(i) एकस्मिन् तरौहंसकाकौनिवासं <u>कृतवन्तौ</u>। (कृ + ..................)

(अ) क्त (ब) क्तवतु (स) शतृ (द) शानच्

(ii) अनुजायपत्रम् <u>लिखितम्</u>। (लिख् + ..................)

(अ) क्त (ब) क्तवतु (स) शतृ (द) शानच्

(iii) <u>याचमानम्</u> नरम् पश्य। (.................. + शानच्)

(अ) याच् (ब) यच् (स) यज् (द) याचि

## खण्ड:—'घ'

## पठित-अवबोधनम् (35 अङ्का:)

9. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत— (1 × 2 = 2)

ततश्च सा साध्वी भर्तु: शुश्रूषां कृत्वा भिक्षामादाय मुने: अन्तिकम् आगता। स: च मुनि: बद्धाञ्जलि: तामवदत्—"कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।" साऽवदत्—"मुने! न भर्तृसेवाया: अपरं कञ्चन धर्म करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्।

I. एकपदेन उत्तरत—

(i) साध्वी भर्तुः किं कृत्वा मनेः अन्तिकम् आगता ?

(ii) स च मुनिः कथं साध्वीम् अवदत् ?

II. पूर्णवाक्येन उत्तरत—

साध्वी किं धर्मकार्यं करोति स्म ?

III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत—

(i) "समीपम्" इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(अ) अन्तिकम् (ब) भिक्षाम् (स) धर्मं (द) आदाय

(ii) "एतादृशं विज्ञानम्" अनयोः पदयोः विशेष्यपदं किम् ?

(अ) अपरं (ब) विज्ञानम् (स) मे (द) तत्रसादेन

**10.** पद्यांशः $(1 \times 2 = 2)$

मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः ।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात् ॥

I. एकपदेन उत्तरत—

(i) भुजङ्गाः कुत्र आश्रयन्ति ?

(ii) चन्दनवृक्षस्य शिखरे के तिष्ठन्ति ?

II. पूर्णवाक्येन उत्तरत—

चन्दनवृक्षः समन्तात् कैः आश्रितम् ?

III. भाषिक कार्यम्—

(i) 'अस्ति' क्रियापदस्य कर्तृपदम् किम् अत्र ?

(अ) आश्रितम् (ब) तत् (स) यत् (द) मूलम्

(ii) 'पक्षी' इत्यर्थे पद्यांशे किम् पदम् प्रयुक्तम् ?

(अ) भुजङ्गः (ब) विहंगः (स) भृङ्गः (द) सर्पः

**11.** अधोदत्तं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत— $(1 \times 2 = 2)$

नगरपालः—महाराज ! मन्त्रिवरस्य आदेशेन अहं समस्ते नगरे भ्रान्तवा कमपि निरक्षरं मूर्खं वा जनम् न अपश्यम् । कुत्र वासयितव्यः पण्डितवर्यः ?

भोजराजः—(क्षणं विचार्य) भो नगरपाल ! त्वं भूयः नगरं याहि । यः नागरिकः काव्यं कर्तुं न जानाति, सः निष्कास्यताम् ।

I. एकपदेन उत्तरत—

(i) नगरपालः नगरे कीदृशं जनं न दृष्टवान् ?

(ii) कस्य आदेशेन नगरपालः नगरे सर्वत्र भ्रान्त्वा आगच्छत् ?

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

II. पूर्णवाक्येन उत्तरत—
भोजराजः पुनः कीदृशं जनं निष्कासयितुम् आदिशति?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत—
(i) नाट्यांशे 'समस्ते' इति पदस्य किं विशेष्यपदं प्रयुक्तम्?
(अ) कूपे (ब) ग्रामे (स) नगरे (द) वने
(ii) 'साक्षरम्' इति पदस्य विलोमपदं किम्?
(अ) क्षारम् (ब) निरक्षरम् (स) क्षीणं (द) क्षयम्

**12.** निम्नलिखितश्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत— ($\frac{1}{2} \times 10 = 5$)

(अ) धत्ते भरं कुसुमपत्रफलावलीनां धर्मव्यथां वहति शीतभवां रुजं च।
यो सर्वमर्पयति चान्यसुखस्य हेतोः, तस्मै वदान्यगुरवे तरवे नमोऽस्तु॥

**अन्वयं** : (यः तरुः) कुसुम-पत्र-(1) ................. भरं धत्ते, (2) ................. शीतभवां रुजम् च वहति। यः च (3) ................. हेतोः सर्वम् (4) ................. तस्मै वदान्यगुरवे (5) नमः अस्तु।

(आ) पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः
गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते॥

**अन्वयं** : (तरवः) पत्र-पुष्प-फल-(1) ................. -मूल-वल्कल-(2) ................. (तथा) गन्ध (3) ................. भस्म-अस्थि- (4) ................. (सर्वेषाम्) कामान् (5) ................. ।

मञ्जूषा

| वितन्वते, निर्यास, तोक्मैः, छाया, दारुभिः, तरवे, अन्यसुखस्य, अर्पयति, फलावलीनां, धर्मव्यथाम् |
|---|

**13.** रेखाकितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत— ($1 \times 5 = 5$)
1. चक्रं हरेः शस्त्रं भवति।
2. गजः मेघश्यामः अस्ति।
3. लेखनी जनानां गूढं भाव प्रकटीकरोति।
4. पादरक्षः दन्तैः हीनः शिलाभक्षी भवति।
5. दीपः पदार्थज्ञानार्थं ज्योतिः यच्छति।

**14.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत— **(5)**
(1) जनकः प्रभावितः भूत्वा तस्मै किञ्चित् दातुम् ऐच्छत्।
(2) "सः अधुना पर्यन्तं न आगतः इति कारणेन अहमपि चिन्तातुरा अस्मि।"
(3) बालः अष्टावक्रः मित्रैः सह क्रीडित्वा मातुः समीपम् आगच्छत्।
(4) अष्टावक्रः—"यद् वस्तु भवदीयम् अस्ति तत् मह्यं समर्पय" इति आदिशति।
(5) सः राजसभायां सर्वैः पण्डितैः सह शास्त्रार्थं कृत्वा तान् अजयत्।

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

(6) आगतः पुत्रः "पिता कुत्र अस्ति" इति मातरम् अपच्छत्।

(7) मातः! चिन्ता मास्तु, अहं राजसभां गत्वा ज्ञास्यामि का वार्ता इति।

(8) माता अवदत्—"भवतः पिता शास्त्रार्थाय जनकस्य सभां प्रति अगच्छत्।"

(9) राजा अपि स्वस्य मनः तस्मै समर्पयति।

(10) मात्रा अनुमतः अष्टावक्रः राजसभां गच्छति।

**15.** प्रसंङ्गानुसारं रेखाङ्कितपदानाम् उचितम् अर्थं चित्वा लिखत— $(1 \times 5 = 5)$

(i) सङ्कल्पविकल्पौ कर्तुं न शक्नोति।
(अ) पारयति (ब) प्राप्नोति (स) गच्छति (द) यच्छति

(ii) ते धनं प्रजायाः सकाशाद् आगतम्।
(अ) मध्यात् (ब) छलात् (स) समीपात् (द) गृहात्

(iii) पिता अधुना न प्रतिनिवृत्तः।
(अ) प्रत्यागतः (ब) निर्गतः (स) निवृत्तः (द) स्वगतः

(iv) शरीरे मनसः प्रभुत्वम्।
(अ) स्वामित्वम् (ब) लघुत्वम् (स) कनिष्ठताम् (द) ज्येष्ठताम्

(v) आत्मा शरीरस्य अध्यक्षः न भवान्।
(अ) प्रबन्धकः (ब) दृष्टा (स) स्वामी (द) पालकः